यम उवाच ।
न तस्या नियमो विप्र ! तपो नैव च सुव्रत ! ।
उपवासो न दानञ्च न दमो वा महामते ! ॥
यादृशी तु भवेद्विप्र ! शृणु तत्त्वं समासतः ।
प्रसुप्ते या प्रस्वपिति विबुद्धे जागति स्वयम् ॥
भुङ्क्ते तु भोजिते विप्र ! सा मृत्युञ्जयति ध्रुवम् ।
मौने मौना भवेद्या तु स्थिते तिष्ठति या स्वयम् ।
सा मृत्युञ्जयते विप्र ! नान्यत् पश्यामि किञ्चन ॥
एकदृष्टिरेकमना भर्त्तुर्वचनकारिणी ।
तस्या बिभीमहे सर्व्वे ये तथान्ये तपोधन ! ॥
देवानामपि सा साध्वी पूज्या परमशोभना ।
भर्त्रा वाभिहिता वापि प्रत्याख्यायिनी भवेत् ॥
वर्त्तमानापि विप्रेन्द्र ! प्रत्याख्यानापि सा यदा ।
तदैव तं संश्रयति पतिं नान्यं कदाचन ॥
भर्त्तुर्मृत्युमुखं ब्रह्मन् ! या पश्यति वराङ्गना ।
एवं याति भवेन्नित्यं भर्त्तुः प्रियहिते रता ॥
अनुविष्टेन भावेन भर्त्तारमनुगच्छति ।
सा तु मृत्युमुखद्वारं न गच्छेद्ब्रह्मसम्भव ! ॥
एष माता पिता बन्धुरेष मे दैवतं परम् ।
एवं शुश्रूषते या तु सा मां विजयते सदा ।
पतिव्रता तु या साध्वी तस्याश्चाहं कृताञ्जलिः ॥
भर्त्तारमनुध्यायन्ती भर्त्तारमनुगच्छति ।
भर्त्तारमनुशोचन्ती मृत्युद्वारं न पश्यति ॥
गीतवादित्रनृत्यानि प्रेक्षणीयान्यनेकशः ।
न शृणोति न पश्येत मृत्युद्वारं न पश्यति ॥
स्नायन्ती तिष्ठती वापि कुर्व्वन्ती वा प्रसाधनम् ।
नान्यञ्च मनसा ध्यायेत् कदाचिदपि सुव्रता ॥
देवता अर्च्चयन्ती वा भोजयन्त्यथ वा द्विजान् ।
पतिं न त्यजते चित्तात् मृत्युद्वारं न पश्यति ॥
भानौ चानुदिते या तु उत्थाय च तपोधन ! ।
गृहं मार्ज्जयते नित्यं मृत्युद्वारं न पश्यति ॥
चक्षुर्देहः स्वभावश्च यस्या नित्यं सुसंवृतम् ।
शौचाचारसमायुक्ता सापि मृत्युं न पश्यति ॥
भर्त्तुर्मुखं प्रपश्यन्ती भर्त्तुश्चित्तानुसारिणी ।
वर्त्तते च हिते भर्त्तुर्मृत्युद्वारं न पश्यति ॥
एवं कीर्त्तिमतां लोके दृश्यन्ते दिवि देवताः ।
मानुषाणाञ्च भार्य्या वै तत्र देशे तु दृश्यते ॥
कथितैवं पुरा विप्र ! आदित्येन पतिव्रता ।
मया तस्माच्च विप्रर्षे ! यथादृष्टं यथाश्रुतम् ॥
गुह्यमेतत्ततो दृष्ट्वा पूजयामि पतिव्रताम् ॥”
इति वाराहे पतिव्रताचरित्रम् ॥ * ॥
पतिव्रताधर्म्मो यथा,—
“पतिव्रतानां यद्धर्म्मं तन्निबोध व्रजेश्वर ! ।
नित्यं भर्त्तुर्य्युतसुकया तत्पादोदकमीप्सितम् ।
भक्तिभावेन सततं भोक्तव्यं तदनुज्ञया ॥
व्रतं तपस्या देवार्च्चा परित्यज्य प्रयत्नतः ।
कुर्य्याच्चरणसेवाञ्च स्तवनं परितोषणम् ॥
तदाज्ञारहितं कर्म्म न कुर्य्यादैरतः सती ।
नारायणात् परं कान्तं ध्यायते सततं सती ॥
परपुंसां पुरुषं वै सुवेशं पुरुषं परम् ।
यात्रामहोत्सवं नित्यं नर्त्तकं गायनं व्रज ।
परक्रीडाञ्च सततं नहि पश्यति सुव्रता ॥
यद्भक्ष्यं स्वामिनां नित्यं तद्देवमपि योषिताम् ।
नहि त्यजेत्तु तत्सङ्गं क्षणमेव च सुव्रता ॥
उत्तरे नोत्तरं दद्यात् स्वामिनश्च पतिव्रता ।
न कोपं कुरुते शुद्धा ताडनाच्चापि कोपतः ॥
क्षुधितं भोजयेत् कान्तं दद्यात् पानञ्च तोषणे ।
न बोधयेत् निद्रालुं प्रेरयत्येव कर्म्मसु ॥
पुत्त्राणाञ्च शतगुणं स्नेहं कुर्य्यात् पतिं सती ।
पतिर्बन्धुर्गतिर्भर्त्ता दैवतं कुलयोषितः ॥
शुभं दृष्ट्वा सुधातुल्यं कान्तं पश्यति सुन्दरी ।
सस्मितं वदनं कृत्वा भक्तिभावेन यत्नतः ॥
पुरुषाणां सहस्रञ्च सती स्त्री च समुद्धरेत् ।
पतिः पतिव्रतानाञ्च मुच्यते सर्व्वपातकात् ॥
नास्ति तेषां कर्म्मभोगः सतीनां व्रततेजसा ।
तया सार्द्धञ्च निष्कर्म्मी मोदते हरिमन्दिरे ॥
पृथिव्यां यानि तीर्थानि सतीपादेषु तान्यपि ।
तेजश्च सर्व्वदेवानां मुनीनाञ्च सतीषु च ॥
तपस्विनां तपः सर्व्वं व्रतिनां यत् फलं व्रज ।
दाने फलं यद्दातॄणां तत् सर्व्वं तासु सन्ततम् ॥
स्वयं नारायणः शम्भुर्विधाता जगतामपि ।
सुराः सर्व्वे सुमुनयो भीतास्ताभ्यश्च सन्ततम् ॥
सतीनां पादरजसा सद्यः पूता वसुन्धरा ।
पतिव्रतां नमस्कृत्य मुच्यते पातकान्नरः ॥
त्रैलोक्यं भस्मसात् कर्त्तुं क्षणेनैव पतिव्रता ।
स्वतेजसा समर्था सा महापुण्यवती सदा ॥
सतीनाञ्च पतिः साध्वीपुत्त्रो निःशङ्क एव च ।
नहि तस्य भयं किञ्चिद्देवेभ्यश्च यमादपि ॥
शतजन्मपुण्यवतां गृहे जाता पतिव्रता ।
पतिव्रताप्रसूः पूता जीवन्मुक्तः पिता तथा ॥
सती स्त्री प्रातरुत्थाय त्यक्त्वा च रात्रिवाससम् ।
भर्त्तारञ्च नमस्कृत्य करोति स्तवनं मुदा ॥
गृहकार्य्यं ततः कृत्वा स्नात्वा धौते च वाससी ।
गृहीत्वा शुक्लपुष्पञ्च भक्तितः पूजयेत् पतिम् ॥
स्नापयित्वा सुपूतेन जलेन निर्म्मलेन च ।
तस्मै दत्त्वा धौतवस्त्रं तत्पादौ क्षालयेन्मुदा ॥
आसने वासयित्वा च दत्त्वा भाले च चन्दनम् ।
सर्व्वाङ्गलेपनं कृत्वा दत्त्वा माल्यं गलेऽपि च ॥
सामवेदोक्तमन्त्रेण भोगद्रव्यैः सुधोपमैः ।
संपूज्य भक्तितः कान्तं स्तुत्वा च प्रणमेन्मुदा ॥
‘ओँ नमः कान्ताय शान्ताय सर्व्वदेवाश्रयाय स्वाहा ॥’
इत्यनेनैव मन्त्रेण दत्त्वा पुष्पञ्च चन्दनम् ।
पाद्यार्घ्यधूपदीपांश्च वस्त्रं नैवेद्यमुत्तमम् ॥
जलं सुवासितं शुद्धं ताम्बूलञ्च सुसंस्कृतम् ।
दत्त्वा स्तोत्रञ्च प्रपठेत् यत् कृतं माध्वमेव च ॥
ओँ नमः कान्ताय शान्ताय शिवचन्द्रस्वरूपिणे ।
नमः शान्ताय दान्ताय सर्व्वदेवाश्रयाय च ॥
नमो ब्रह्मस्वरूपाय सतीप्राणपराय च ।
नमस्याय च पूज्याय हृदाधाराय ते नमः ॥
पञ्चप्राणाधिदेवाय चक्षुषस्तारकाय च ।
ज्ञानाधाराय पत्नीनां परमानन्दरूपिणे ॥
पतिर्ब्रह्मा पतिर्विष्णुः पतिरेव महेश्वरः ।
पतिश्च निर्गुणाधारो ब्रह्मरूप ! नमोऽस्तु ते ॥
क्षमस्व भगवन् ! दोषं ज्ञानाज्ञानकृतञ्च यत् ।
पत्नीबन्धो ! दयासिन्धो ! दासीदोषं क्षमस्व च ॥
इदं स्तोत्रं महापुण्यं सृष्ट्यादौ पद्मया कृतम् ।
सरस्वत्या च धरया गङ्गया च पुरा व्रज ॥
सावित्र्या च कृतं पूर्व्वं ब्रह्मणे चापि नित्यशः ।
पार्व्वत्या च कृतं भक्त्या कैलासे शङ्कराय च ॥
मुनीनाञ्च सुराणाञ्च पत्नीभिश्च कृतं पुरा ।
पतिव्रतानां सर्व्वासां स्तोत्रमेतत् शुभावहम् ॥
इदं स्तोत्रं महापुण्यं या शृणोति पतिव्रता ।
नरोऽन्यो वापि नारी वा लभते सर्व्ववाञ्छितम् ॥
अपुत्त्रो लभते पुत्त्रं निर्द्धनो लभते धनम् ।
रोगी च मुच्यते रोगात् बद्धो मुच्येत बन्धनात् ॥
पतिव्रता च स्तुत्वा च तीर्थस्नानफलं लभेत् ।
फलञ्च सर्व्वतपसां व्रतानाञ्च व्रजेश्वर ! ॥
इदं स्तुत्वा नमस्कृत्य भुङ्क्ते सा तदनुज्ञया ।
उक्तः पतिव्रताधर्म्मो गृहिणां श्रूयतां व्रज ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८३ अध्यायः ॥ * ॥
पतिव्रतानामानि यथा,—
सूर्य्यस्य सुवर्च्चला १ शक्रस्य शची २ वशिष्ठस्य अरुन्धती ३ चन्द्रस्य रोहिणी ४ अगस्त्यस्य लोपामुद्रा ५ च्यवनस्य सुकन्या ६ सत्यवतः सावित्री ७ कपिलस्य श्रीमती ८ सौदासस्य मदयन्ती ९ सगरस्य केशिनी १० नलस्य दमयन्ती ११ रामस्य सीता १२ शिवस्य सती १३ नारायणस्य लक्ष्मीः १४ ब्रह्मणः सावित्री १५ रावणस्य मन्दोदरी १६ । इति पुराणान्तरम् ॥ (गायत्रीस्वरूपा भगवती । यथा, देवीभागवते । १२ । ६ । ६६ ।
“पतिव्रता पवित्राङ्गी पद्महासपरायणा ।
प्रज्ञावती सुता पौत्त्री पुत्त्रपूज्या पयस्विनी ॥”)

पतेरः, पुंस्त्री, (पतति गच्छतीति । पत्लृ गतौ + “पतिकठिकुठिगडिगुडिदंशिभ्य एरक् ।” उणां १।५६। इति कर्त्तरि एरक् ।) पक्षी । गन्तरि त्रि । इत्युणादिकोषः ॥

पतेरः, पुं, (पतत्यस्मिन्निति । “पति कठीति ।” उणां १।५६। इति अधिकरणे एरक् ।) आढ़कः । गर्त्तः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पतङ्गं, क्ली, (पत्त्रमिव अङ्गं यस्य । पृषोदरात्साधु ।) रक्तचन्दनम् । इति शब्दरत्नावली ॥ वृक्षविशेषः । बकम् इति भाषा । तत्पर्य्यायः । पत्राङ्गम् २ रक्तकाष्ठम् ३ सुरङ्गदम् ४ पत्राढ्यम् ५ पट्टरङ्गम् ६ भार्य्याऽदृष्टः ७ रक्तकः ८ लोहितम् ९ रङ्गकाष्ठम् १० रागकाष्ठम् ११ कुचन्दनम् १२ पट्टरञ्जनकम् १३ सुरङ्गम् १४ । अस्य गुणाः । कटुत्वम् । रूक्षत्वम् । अम्लत्वम् । शीतलत्वम् । गौल्यत्वम् । वातपित्तज्वरविस्फोटोन्मादभूतनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च भावप्रकाशे ।
“पतङ्गन्तु रक्तसारं सुरङ्गं रञ्जनं तथा ।
पटरञ्जनमाख्यातं पत्तूरञ्च कुचन्दनम् ॥
पतङ्गं मधुरं शीतं पित्तश्लेष्मव्रणास्रनुत् ।
हरिचन्दनवज्ज्ञेयं विशेषाद्दाहनाशनम् ॥”